नं० ४९५२

नाम - शारदातिलकटीका गूढार्थदीपिका

कर्ता - त्रिविक्रमशं० भट्टारक० रामभारतीशिष्यः

पत्रसंख्या - ४७ पत्राणि सं० —— ×

विषय० - तंत्रम्

शृगारदातिलकटीका गूढार्थदीपिका

धधपर

4952

Introduction = 2

F = 47+2 = 49



ॐ स्वस्ति श्रीगणेशाय नमः ॥ भवं भवानीतनुजं गणेशं विघ्नभञ्जनं । नमस्यामि तथा भक्त्या सर्वकार्यप्रसि-
द्धये ॥१॥ नत्वा विष्णुं इष्टविद्यां सर्वज्ञं नाम भारतीं । त्रिविक्रमस्तु मुनिना तत्क्षिप्रेणस्तु धीमता ॥२॥ शारदातिल-
काख्यस्य ग्रन्थस्य क्रियते मया । टीका बालप्रबोधाय नाम्ना गूढार्थदीपिका ॥३॥ प्रारिप्सितग्रन्थस्य
स्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतानमस्कारः क-
र्तव्यः ग्रन्थविषयप्रयोजनसंबन्धाधिकारिणश्च दर्शनीयाः प्रवृत्त्यंगत्वेन ते एवं सगुणनिर्गुणभेदेन दे-
वतानमस्कारेण तत्सर्वं दर्शयितुमाचार्य आह नित्यानन्देति ॥१॥ अयमर्थः तन्महो वो युष्मान् अव्यात्
दिति संबन्धः किं तत् येन महसा चराचरात्मकमिदं जगद्व्याप्तमनुस्यूतं चरं जंगमं अचरं स्थावरं तदुभ-
यात्मकं कथंभूतं जगत् शब्दार्थरूपं तदुभयात्मकमित्यर्थः कथंभूतं महः नित्यानन्दवपुः नि-
त्यश्चासावानन्दश्चेति नित्यानन्दः स एव वपुः शरीरं यस्य तत्तथा आनन्दैकरसस्वभावमित्यर्थः कै-
र्व्याप्तं निरन्तरगलत्पञ्चाशद्वर्णैः अनवरतमभिव्यक्तपञ्चाशद्वर्णैः अथवा निरन्तरं स्ववद्भिर्वा कथं क्र-
मात् एतदुक्तं भवति महसो मूलकारणात् जन्यत्वात्पञ्चाशद्वर्णानां तत्कार्यरूपं शब्दार्थरूपे जग-
ति तद्व्याप्तत्वात् व्याप्तिः सिद्धेति पुनः किं विशिष्टं यदेतदन्तर्गतं प्राणिषु चैतन्यं तदेव सुकृतिनस्तपोध-
नाः शब्दब्रह्मेत्यूचिरे अवोचन् कथं अनिशं सदा पुनः कथंभूतं शशाङ्कसदनं शशाङ्कश्चन्द्रमास्त-
स्य सदनमालयमधिष्ठानमिति यावत् पुनः कीदृशं वाचामधीशं वागधिपमित्यर्थः महा

१

र्थस्तु चित्यानन्दवपुरित्यनेन प्रयोजनं सूचितं चिरन्तरमलत्वच्चाशादर्शौ इति विषयो निर्दिष्टः एवंविध प्रयोजनार्थी अधिकारी त्यर्था सूचितः शास्त्रं तत्साधनं इति साध्यसाधनलक्षणसंबन्धोपि सूचितः इति प्रथमश्लोकस्यार्थः एवं शिवशक्त्यात्मकत्वात् सकलप्रपञ्चजालस्य सगुणत्वेन शिवरूपमभिधाय निर्गुणरूपेण शक्तिरूपमभिधत्ते अन्तःस्मितेति २ अस्यार्थः वो युष्माकं नवेन्दुमौलेरन्तःपुरं मंगलं कल्याणं दिशतु प्रयच्छतु करोतु वा नवश्चासाविन्दुश्चेति नवेन्दुः द्वितीयाचन्द्रमाः स मौलौ यस्य सः नवेन्दुमौलिः तस्य शिवस्यान्तःपुरं स्त्रीगारं तस्या भवपत्नी लक्ष्यते कथं आदरात् अनुग्रहात् कीदृशमन्तःपुरं त्रिलोकविभवस्य हेतुः त्रयाणां लोकानां विभवो विस्तारस्तस्य कारणं पुनः कथंभूतं इन्दीवरोदरसहोदरनेत्रशोभि इन्दीवरस्योदरमभ्यन्तरं तस्य सहोदरे सदृशे नेत्रे ताभ्यां शोभि विराजितं दीप्तिमद्वा पुनः कीदृशं इन्दुकलावतंसं इन्दोः कला इन्दुकला सैवावतंसः शिरोभूषणं यस्य तत्तथा कर्णभूषणं वा पुनः कीदृग्विधं अन्तःस्मितोल्लसितं ईषद्धासेन शोभितं यद्वा अन्तःस्मितवक्रभ्रूमित्यर्थः एवंविधा शुभ्रा सा भारती परमेश्वरस्य जगन्निर्माणदोषसहकारिणी शक्तिर्युष्मभ्यं कल्याणं प्रयच्छत्विति श्लोकार्थः यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ इति न्यायाद्देवतानमस्कारानन्तरं गुरुनमस्कारं करोति संस्सारेति ३ गुरून्नमस्यति प्रदधे वहे कथंभूतान् शिवस्वरूपान्देवरूपान् पुनः कीदृशान् संसारपयोधिं ध्रुवसिन्धुदुस्तरत्वात् तस्य तरणे लङ्घने एकहेतून्

शा॰ ति॰
टी॰ पू॰
२

न्साधारणाकारलम्भनानुपदेशाद्वारान् पुनः कथंभूतान् येषां गुरूणां पादपंकजरजांसि धूलयस्तीर्थ(
प्रभिषेकस्तस्य श्रीलज्जनितं पुण्यमावहन्ति स्वीकुर्वन्ति प्रयच्छन्ति चेति श्लोकार्थः ॥ गुरुदेवतानमस्को
रानन्तरं ग्रंथनामपूर्वकं प्रतिज्ञां कुरुते सारमित्यादिना तंत्राणां मंत्रशास्त्राणाम् उत्तरार्धेन प्रयोजन
माह ग्रन्थप्रतिपाद्यं संक्षेपतो दर्शयति शाक्तार्थेति ५ मुनिभिः ऋषिभिः संक्षेपतः शब्दसृष्टिं वक्ष्ये सगुणेति
गुणाभेदं परमेश्वरं दर्शयति निर्गुण इति ६ प्रकृतेरन्यः केवलः सकलस्त्वविद्यासंभिन्नः इदानीं सृष्टिमा
ह सच्चिदानन्देति ७ सकलो यः सूक्ष्मरूपेणाधाराविद्यासहितात्परमेश्वराच्छक्तिरजायत अयमर्थः सूक्ष्मरू
पेणाध्यस्ता या विद्या सैव पराशक्तिः तस्याः सूक्ष्मरूपपरिहाण्या घनीभूता गुणवैषम्ये स्थूलरूपेणावस्थानं
जननं नाम ततो नादः नदनं नादः तस्या एव सूक्ष्मोपयोगित्वं नकारादितः शब्दात्मिकावस्थानाद्बिन्दुः तस्या ए
व सत्त्वादिगुणत्रये कार्योन्मुखे सत्त्वरजस्तमसि वा उच्छूनावस्था भवति सैव बिन्दुरित्युच्यते परशक्तीति ८
स एव बिन्दुर्मूलप्रकृतिविकारः अत एव शक्तिमयः पुनस्त्रिधा भवति त्रैविध्यमेव दर्शयति बिन्दुरिति
केन प्रकारेण स्थूलसूक्ष्मपरत्वेनेति तदुक्तं प्रपंचसारे सबिन्दुर्भवति त्रिधेत्यादि ननु सर्वप्रपञ्च
स्य शिवशक्तिमयत्वात् कथं शक्तिमयत्वमेवेत्यत आह बिन्दुरिति ९ किं तत्र प्रमाणमित्यत आह तैरे
व बिन्दुनादबीजैर्यथाक्रमं रुद्रब्रह्मविष्णूनां रौद्री ज्येष्ठा वामेति तिस्रः शक्तयो जायन्त इत्याह रौ
द्रीति वक्ष्यमाणोपयोगित्वेनैषां रुद्रादीनां स्वरूपमाह तेज्ञाने छेति ११ इदानीं शब्दसृष्टिं कथ

२

2

प्रतिभिद्यमानादिस्पादितापरादिन्दोऽहंकृतलक्षणान्तर्वर्तिकालिकशक्तिमयादिदं सेत्यर्थः ननु
तिरं न तस्य स्वस्वरूपावस्थितस्य शब्दविशेषरूपेणाविभाव्यमानत्वेऽस्य स्वभावो यः स्वरूपत्वं तमेव निर्विशेषत्वेऽपि शा
ब्दमात्रं शब्दब्रह्मेति स्फुटीकरोति विद्वः सेगिरन्तदित्याह शब्दब्रह्मेति १२ स्फोटरूपतत्त्वनिर्णायकत्वार्थमाह श
ब्दब्रह्मेति शब्दार्थयोरिति किंरूपत्वादित्यतो भूषणं पर्यवेक्ष्य शेषरूपत्वं तदेवेत्याह नहि तेषामि
ति १३ अपृथग्भावः तेषां शब्दानां वा शब्दार्थानां वा शब्दब्रह्मेति वादिनां उभयोः शब्दतदर्थयोरभेदत्वा
त्वे अर्थावबोधकत्वायोगात् स्वमतमाह चैतन्यमिति अयं निरूढः अर्थावबोधान्यथानु
पपत्त्या कल्प्योऽप्यवेऽस्ति स्फोटोऽप्यर्थावबोधको न भवति शब्दतदर्थावपि बोधको न भवतः किं
तु स्वरूपमात्रविशिष्टे वर्णात्मकैः शब्दैरनुमीयमानमवश्यं शब्दतन्मात्रलक्षणमर्थचैतन्य
विशिष्टं शब्दब्रह्मेति विद्वांसो विदांचक्रुः अतस्तु परादिविशिष्टाः शब्देऽमन्मात्रानुमापकाः अ
थाह्यापर्यशब्दा चैतन्यसंदृष्टतया अर्थावबोधकाः शरीरतः शब्दोत्पत्तिप्रकारः संक्षिप्यो
च्यते तस्माच्चेति १४ तस्मादप्यचैतन्यं प्राप्य इदानीं स्वागमानुसारेण शिवादिपंचकोत्पत्तिमाह
अथेति १५ १६ बिन्दुः शिवरूपस्थस्य कालपादेन शिवशक्तेः संबन्धः स्वीक्रियते कलापादेन
शक्तिमतोरभेदविवक्षया कलात्मनः स्वतः स शक्तिकात्किवादेव शिवादीनामुत्पत्तिरिति
बोद्धव्यं इदानीमर्थसृष्टिमाह तत्मात्रादिति १७ तस्मादेव शिवादित्यर्थः तत्त्वान्तः करण

शा. ति.
टी. गू.
२

त्मकमिति गुणाः सत्वादयः अन्तःकरणवृत्तिरूपं तदात्मकं महत्त्वमासीदित्यर्थः तस्मान्महतत्वा
दहंकारो वैकारिकतैजसभूतादिर्भिन्नो जायत इत्याह अथ तस्मादिति १८ १९ कथंभूतादहंकारात्के
षामुत्पत्तिरित्यत आह क्रमेण वैकारिकादित्यादिना तन्मात्रक्रमयोगत इति शब्दादितन्मात्रक्र
मयोगत इति एवं भूतानामेवोत्पत्तिप्रकारमाह शब्दात्खमिति शब्दात् स्पर्शात् तन्मात्रादिति
एवमुत्तरत्रापि ज्ञेयं तेषां भूतानां वर्णानाह स्वकं वियदित्यादिना क्रमेण तेषां गुणानाह ।
शब्द इत्यादिना उत्तरत्र तत्तत्कार्योपयोगितया तेषां मंडलानि कथ्यन्ते इत्तदिव इत्यादिना २३ ।
तेषां मण्डलानां वर्णानाह ततद्वृत्तेति इदानीं तत्तद्भूतोत्थकलाः क्रमेण प्रदर्श्यन्ते धराद्वीति
तास्वनाद्जास्तेषाः एतत्कथनस्योपयोगमाह पंचभूतेति २७ इदानीमर्थसृष्टिं व्यनक्ति अ
चराइत्यादिना स्वेदाण्डजजरायुजाद्भिज्जकं तानेव विविच्य दर्शयति स्वेदजादित्यादिना कश्चिदि
त्यादिना कश्चिदित्यारभ्य अन्तःकरणमात्मन इत्यंतः स्पष्टार्थः अन्तःकरणवृत्तिरूपमाह म
नइति अष्टौ प्रकृतयः षोडश विकृतयश्च प्रदर्श्यन्ते दशेत्यारभ्याऽष्टाविंशन्तेन तन्मात्राह
त्यादिना प्रकृतिविकृतयः अन्ते षोडशात्मकमित्यारभ्य जायते यत्र वाड्मुखेद्दर्शतः शरीरव
र्तानपरोक्ष्यः स्पष्टार्थः जननानन्तरं भीत्या रोदिति मिश्रितीभुक्ते भयवैमनासो जन्तुभय
नितेत्यर्थं किमपि वक्तुमभिलषति तस्यैव हृदि बोधिविद्या वशेन शब्दो जायते ततो

२

मूलाधारे दैहिकवायौ विक्रिया भवति तया मूलाधारावच्छिन्ने शब्दब्रह्मणि कश्चिन्नादो जायते स भावः
पराख्यः स नाभिदेशं प्राप्य पश्यन्तीसंज्ञां लभते स एव हृदयं प्राप्तो मध्यमाख्यां प्राप्नोति वक्त्रे वैखरी
ति वक्त्रप्रदेशेन कण्ठादिस्थानान्यभिधीयन्ते स्वरादिक्रमविशिष्टरूपेण वर्णाभिव्यक्तिरूपेण वक्त्रे वैख
रीत्युच्यते तेन तेन तत्तत्स्थानस्पर्शकधेत्यन्तः प्राकृतेन गुम्फितेन कुण्डलिनीस्वरूपं वर्णयति त्रिधाम
शब्देनाग्नीषोमसूर्यात्मकमुच्यन्ते कुमारस्य शरीरे सुषुम्णाख्ये परमेश्वरेणानुबद्धा परा शक्तिः कुण्ड
लिनी मूलाधारान्निर्गच्छन्ती मन्त्रजालानि तदनुबद्धानि चान्यानि वहन्ती नियन्त्रालि सुसूक्ष्म
रूपेण लोलायमानेत्याह एकधा गुणिता शक्तिरित्यादिना तत्स्वरूपमकार्यानुगुणेन यया सुषुम्णा
ख्येन परमेश्वरेण योऽसौ संसर्गः यथा वीणातन्त्र्यां गुणितं संयोगः परस्पराः शक्तेः स एव गुणितशब्देनो
च्यते वेदादिबीजं प्रणवः स्पष्टार्थमपरं गुणत्रयं सत्त्वादि धामत्रयमग्नीषोमसूर्याः वेदानां त्रयं ऋ
गादयः वर्णत्रयं अकारउकारमकाराः त्रिपुष्करं तीर्थस्थानविशेषः स्वरा उदात्तादयः वह्नित्रयं दक्षि
णाग्निगार्हपत्याहवनीयं शक्तित्रयं प्रभुमन्त्रोत्साहशक्तयः अथवा ब्रह्मविष्णुमहेश्वराणां शक्त
यः वृत्तित्रयं अध्यापनयाजनप्रतिग्रहाः नाडीत्रयं सुषुम्णादि त्रिवर्गं धर्मार्थकामाः पद्मिनीबं
न्धोः सूर्यस्य देवी तत्त्वानि वस्पति सूक्ष्मादिभावाः परापश्यन्त्याद्याः त्रिलोमूर्तिं च तत्त्वं वासुदे
वादिचतुष्टयं पीठमिति ओड्याणजालंधरपूर्णगिरिकामरूपाणि धर्मादीनामिति धर्मस्तानवैरा

शा॰ति॰
टी॰स॰
४

म्येश्वर्योदि गणाकमकारस्यो वक्ष्यमाणाः सर्निपंचकमीशानादिकलाश्रुतत्रैव वक्ष्यंते पंचब्रह्म सद्यः
ईशानः सर्वविद्यानामित्यादयः षडाधारान् मूलाधारनाभिहृदयकंठभ्रूमध्यद्वादशान्तान् शक्ति
तत्वादीन्यष्टौ सूक्ष्मप्रवृत्ते शास्त्रे सूत्रे रूपमयी विभूतिर्मतः शाक्तं नोग्र्यन्यः स्पष्टार्थः पवमर्धेस्त्र्यंशिं प्रवेष्यण
कृतः शिवप्रपञ्चयति शक्तितत्वमित्यादिना शक्तिर्नाम सकलकारणस्य शब्दब्रह्मणस्तत्वीकरणावस्था
ततो ध्वनिः तदनन्तरं नादः शब्दस्यावस्था अमनन्तस्त्वमनिरोधिकाली तांस्त्वरूपं त्वय मे वा गेक
यियिष्यति ततः सर्वीत्पर्वीपश्यंतीत्यादिक्रमेण वर्णमालिकां सृजतीत्यर्थः कथंभूतां वर्णमा-
लिकां नपुंसकान्विहाय अकारादिक्षकारान्तमितीकः पतेः पंचाशद्वाररसुमितां कुंडलीं अकारा
दि पंचाशद्वर्णमालिकां सृजत्तदस्ति परः एषमुख्यः उत्तरत्रयो योगिपयोगितया वर्णानामग्नीषो
मात्मकत्वेनसूर्याग्निरूपत्वं च सन्निभिर्त्तं दर्शयति जातमित्यादिना इति श्रीशारदातिलकटी-
कायां सर्वार्थदीपिकायां प्रथमः पटलः १ ॥ संक्षेपतो वर्णानामुत्पत्तिमभिधायेदानीं तेषामेव
स्पष्टतयोत्पत्तिं कथयितुं कालोत्पत्तिं च कथयितुं द्वितीयः पटल आरभ्यते ततो व्यक्तित्यादि
ना तत्र सोमसूर्याग्निरूपत्वं क्रमेण स्वरस्पर्शव्यापकानां दर्शयति एषु स्वरा इत्यादिना तत्वात्मा
नमिति वर्णविंशति त्वेस्वरूपाः यतो मकारः सूर्यस्वरूपः पुरुषः अंद्र इति बिन्दुः शिवस्वरूपो तेपः
अः इति विसर्गः शक्तिस्वरूपः अतः शक्तिसहितात्परमेश्वराज्जगदुत्पत्तिरीयेते तस्मात्क्विवश

४

तथात्मकाद्वर्णसमुदायात्पंचभूतानामुत्पत्तिरिति वक्तुं भूतानां वर्णभेदमाह तत्रोऽभूतात्मका
इति इत्याइति अइउऋऌ दीर्घाइति आईऊॠॡ संधिविकृताः एऐओऔ अं विसर्गस्सर्वेका
शात्मानस्पर्शः गएपाते पंचशः कादयः यकारादयः पंचवत्वलसहान्ताः पंचभूतानां दशदशवि
शेषाः तत्रोक्तानष्टकारस्वरोर्वत्सते सोमसूर्याग्निभेदेन त्रयस्त्रयाणामेकरूपान्मातृकारूपसमु
दायाद्यथाक्रममष्टात्रिंशत्कलानामुत्पत्तिमाह मन्त्रतामानदेत्यादिना अत्र त्रयोर्योगेनयो
गितया इदानीं पंचाशद्वर्णैः श्रीकंठादिमूर्तीर्यत्र तदुक्तपञ्चविष्णुमूर्तीर्यत्र तदुक्त
पश्चान्निरूप्यन्ते श्रीकंठइत्यादिना कलशादिन्यासादिषु वोपयोगितया इदानीं मन्त्रतां
मन्त्रविद्याविभागं सोमसूर्याग्निभेदेन तेषामेव वृषपादिकमेस्तमामथ्र्येचक्रमेणदर्शयति ।
मंत्रविद्याविभागेनेत्यादिना ग्रंथुनामंत्राणांप्रबोधकालएवफलदायकत्वात्तद्दर्शयति स्वापे
यादित्यादिना निर्दुष्टाएवमंत्राः फलदायकाः इत्येवंमंत्राणांदोषं तन्निराकरणोपायंचक्रमे
णदर्शयति छिन्नादिदुष्टाइत्यादिना प्रत्येकं तेषांछिन्नादिदुष्टानां लक्षणमाह मनोरित्या
दिना अग्निनेवायुबीजं यकारः संयुक्तं ककारादिना वियुक्तं केवलं स्वराक्रान्तं दीर्घस्वराक्रान्तं
भूबीजेलकारः माया ह्रींकारः त्रितत्वंब्रह्मविष्णुमहेश्वरतत्त्वेरावः ऐंकामबीजं क्लीं अंकुशः ।

शा॰ति॰
टी॰नू॰
५

क्रौं हकारः शम्भुः सकारो वा बिन्दुसंयुतः वान्तफले हूंस्त्रं फट् ॐ इंदो लकारः शिवः बिंदुः शक्ति विं
सर्गः क्रोधो हूंकारः इत्यादि दुष्टमंत्राणां दोषापगमनं तरेण फल [illegible] जनकत्वाभावात् नदोषा
पगमोपायमाह दोषदुष्टानित्यादिना स्वराशि कोष्ठानामनुकूलान्मन्त्रान्जपेदित्युक्ते तत्र वर्णे
भ्यः पवनतत्राणां मन्त्राणां त्वा केभ्यो वर्णेभ्यः कस्य नक्षत्रस्योत्पत्तिरित्याशंक्य नक्षत्र वर्णविभा
गमाह प्रापत्नो भेति अत्रग्रन्थकारस्याकारादयः स्वराः केनाभिप्रेताः तथा कटपयवर्गभवैरिह
पिण्डान्त्यैरक्षरैरंकाः इत्येतत्संप्रदायेन षास्वरे केवले कथितमिति अत्र कटौ नववर्गौ पःपंचार्णैः
यो यस्त्वष्टार्णैः शान्तः पिण्डस्य पुरस्तात् नत्र अन्त्यो नोकः अयंभावः प्रा २ भरणी आभ्यां अश्विनीन
क्षत्रं जातं प १ इत्येतस्मात् कृत्तिका ४ रू रोहिणी ५ च भ्यो रोहिणी
त्य १ प एतस्मात् मृगशिरः ३ः १ प एतस्मादार्द्रा २ ओओ आभ्यां पुनर्वसुः ५ १ क एतस्मा
त्पुष्यः ह २ [illegible] आभ्यां अश्लेषा ३ २ ड मघा ५ १ च एतस्मात् पूर्वा २ [illegible] आभ्यामुत्तरा
ह २ [illegible] आभ्यां हस्तः ह २ टठ चित्रा ४ १ ड स्वातिः ५ २ ढण विशाखा ला २ तथद पभ्यो
नूराधा क १ ध ज्येष्ठा ला २ नपफ पभ्यो मूलं प १ ब पूर्वाषाढा प १ भ उत्तराभाद्रपदा धो ४
श्रवणः लेन्तः पभिः रेवती इति श्लोकार्थः नक्षत्रगणनप्रकारमाह जन्मेति राशीनामपि वर्णे

५

स्थ५वोत्पत्तिः अत्रापि वर्णभेदप्रकारमाह वालेगोरमित्यादिना अयमर्थः वा ८ अआइई
मेषः लं ३ उऊऋॠवृषः मौ २ ऌॡमिथुनं १ २ एऐकर्कः खु २ ओऔसिंहः १ २ अंअः अ
षसहलंक्षः कन्या शो ५ कवर्गः तुला ण ५ चवर्गः वृश्चिकः श ५ टवर्गः धनुः मी ५ तवर्गः
मकरः शो ५ पवर्गः कुंभः भ ४ यरलवा मीनः इति राशिषु भेदिना वर्णा इति श्लोकार्थः रा
शीनां फलमाह लग्नइत्यादिना सिद्धसाध्यादिनिरूपणप्रकारमाह चतुरस्रे इत्यादिना
तेषां फलमाह सिद्धादीति सिद्धादिवर्णानां बान्धवादिनामान्याह सिद्धार्णा इति कूर्मचक्रले
खनप्रकारं तत्फलं चाह चतुरस्रमिति मंत्रजपस्थानान्याह पुण्ये क्षेत्र इत्यादिना जपकालस्या
हारनियममाह भैक्ष्यमित्यादिना इदानीं गुरुशिष्यलक्षणमाह मातृत इत्यादिना शिष्यस्य गु
रोः गुरुसेवाविधिमाह एकाहेनेत्यादिना ॥ इति गूढार्थदीपिकायां द्वितीयः पटलः २ ॥
अथेदानीं वास्तुपूजां मंडपकरणं कुण्डादिनिर्माणं च यथावद्वक्तुं तृतीयः पटल आरभ्यते तत्रैव
क्ष्यामीत्यादिना तत्र प्रथमं वास्तुमंडलनिर्माणप्रकारस्तत्पूजाप्रकारश्च कथ्यते कृतेनेत्यादिना
मंडपरचनप्रकारमाह ततो भूमितल इत्यादिना अंकुरारोपणप्रकारं तन्मंडलरचनप्रकारं पुरःस
रं कथयति प्रागेवेत्यादिना अंकुरपात्रनामान्याह पालिकेति सुधाबीजं वकारः बीजान्याह
शालीति आंध्रभाषायां कंडुल कान्यकुब्जभाषायां .... आन्ध्रभाषायां कोललु भाषां
तरे कुद्रू कीलङ्कु २ तरभाषायां कंगुणी करंभाश्चेति यवाः पूर्वादिक्रमेण कुंडानां रचनाप्रकारमा
ह कर्त्रेति मानान्तरमाह यवानामिति चतुरस्रे पञ्चधा विभक्ते तस्य पुरस्तात्कोणार्धार्धमा

शा॰ ति॰ टी॰ दू॰ ६

नेनैकमंशं लाञ्छयेत् ततः पश्चिमरेखामध्यादारभ्य नैर्ऋतकोणपर्यन्तं दक्षिणरेखामध्यपर्यन्तं चान
येदुभयतः ततो ऽग्निकोणस्य सूत्रहृदयमारभ्य पूर्वलाञ्छनपर्यन्तं दक्षिणे नैर्ऋतः सूत्रहृदयं दद्यात् ततोऽग्नि
त्रिभिर्भक्तं कृतं स्मरं भवति अधोवक्त्रं दर्शयति चतुरस्त्रीति चतुरस्त्रीकृते क्षेत्रे दशधा विभक्ते च अधऊर्ध्व
मेकैकमंशं त्यक्त्वा अग्नेरारभ्य सूत्रं तेन संदद्यात् तथा नैर्ऋतमारभ्य दक्षिणकोणपर्यन्तं पश्चिमकोणद्वय।
पार्श्वयोः दक्षिणोत्तरविभक्तयोः अधोवक्त्र इति भक्तं कृतं भवति चतुर्धा विभक्ते क्षेत्रे चतुरस्र पश्चिमकोण
द्वयपार्श्वयोर्दक्षिणोत्तरयोः चतुर्भागमध्ये एकमेकं भागं यावत्तावल्लाञ्छयेत् एकमेकमपनीय ला
ञ्छयेत् पूर्वलाञ्छनात् पश्चिमलाञ्छनपर्यन्तं सूत्रद्वयं कोणयोः पश्चिमरेखां यावत् पश्चिमलाञ्छनद्व
यं वर्धयेत् पद्मकृते स्यात् त्रिकोणं कृतं भवति अष्टादशधा विभक्ते क्षेत्रे बहिरष्टदिक्ष्वेकमंशं ला
ञ्छयेत् आग्नेयोन्नतमानेन वर्तुलं कृतं वृत्तं भवेत् अष्टधा विभक्ते क्षेत्रे मध्यसूत्रस्य दक्षिणतः
पूर्वपश्चिमपार्श्वयोरेकैकं लाञ्छयेत् क्षेत्राद्बहिः पूर्वपश्चिमसूत्रद्वयमध्येऽप्येकैकमंशं न्यसेत्।
पूर्वलाञ्छनान्मध्यसूत्रपार्श्वलाञ्छनपर्यन्तं तथैव दक्षिणतः पश्चिमलाञ्छनपर्यन्तं सूत्रद्वयं दद्यात्
अनेनार्धमध्यसूत्रदक्षिणोत्तरपार्श्वद्वयलाञ्छनयोर्मध्ये पूर्वपश्चिमायतं सूत्रद्वयं न्यसेत् एवं षट्सूत्रपा
तेन षडस्रं स्मरमन्दिरं यदुक्तं तदाकारं कृतं निष्पद्यते अष्टादशधा विभक्ते क्षेत्रे बहिरेकं भागं न्यस्य च
तुर्दिक्षु तेन मानेन भ्रामयेत् पुनर्वेतल्लक्ष्य कृत्वा केसराणि परिकल्पयेत् तदुपरि वर्तुलं कृत्वा प

सर्वे॰

६

ग्राणि तदुपरि वर्तुलं भ्रामयेत् एवं कृते पद्मानि भंकुदं भवति चतुर्विंशतिधा विभक्ते तु वेदित्वं बहिव
दिकैकैकं भागं विन्यस्य पूर्वलांछ्य मादक्षिणलांछनपर्यंते तस्मादुत्तरलांछनपर्यंतं तस्मात्पश्चि
मलांछनपर्यंतं तस्मात्पूर्वलांछनपर्यंतं सूत्रचतुष्टयं कृते चतुरस्रादक्षिणुतुरस्रं भवति ततन्त
रमध्यस्य चतुरस्रकोणधृग्धीमानेन बाह्यचतुरस्रस्य एकैककोणपार्श्वयोरेकैकांशं लांछयेत्।
दिशं प्रतीत्ययमर्थः पूर्वकोणदक्षिणपार्श्वलांछनात् दक्षिणस्य पूर्वलांछनपर्यंतं आग्नेयसू
त्रं तस्माद्दक्षिणपश्चिमदक्षिणलांछनपर्यंतं नैर्ऋतिसूत्रं पातयेत् तस्मात्पश्चिमोत्तरलांछ
नपर्यंतं वायव्यसूत्रं पातयेत् ततः पूर्वोत्तरलांछनपर्यंतमीशानसूत्रं पातयेत् तस्मादनंतरं द
क्षिणलांछनपर्यंतं पूर्वसूत्रमित्येवं दिशं प्रत्यष्टसूत्राणि पातयेत् एवं कृते ष्टास्रं कुण्डं रमणी
यं भवति उक्तरोयमन्यः स्पष्टः वस्र अष्टौ तर्कः षट् युगं चत्वारि भानि द्वादश पंक्तिः दश मनुश्च तदे
ण स्थलारभ्येति द्वितीयमेखलासंदष्टा मारभ्येति यावत् नालं योन्याधारं मूलमग्र
धीकारं कल्पयेत् सत्प्रथके मेखलानालमध्ये परिधिस्थाणं पीठरन्ध्रं कल्पयेत् शाखोक्तवि
धिना वक्ष्यमाणप्रकारेण तमेव प्रकारं दर्शयति पद्मे तद्यस्येति संधिस्थस्थाने केसरं धिस्थाने
पदानि त्रीणीति चैकजस्थाने षट्त्रिंशत्पदमध्ये कोणत्रितिदिनानि त्रीणि अवशिष्टचतुष्कोणभं
तरालपदानि पीठगात्राणि द्विचतुष्कोष्ठकैः क्रमेण भंतर्बाह्यपंक्तिकोष्ठानीत्यर्थः त्रिभिरभ्यं

नरैरेकेन वह्निः एकेन त्रिभिरभ्यन्तरबाह्ययोः वर्णानां व्यत्ययमाह हरिद्रेत्यादिना स्पष्टमपरम्
इति गूढार्थदीपिकायां तृतीयः पटलः ॥ ३ ॥ इदानीं दीक्षाप्रकारं वक्तुमारभते अथेति दीक्षाश
ब्दार्थमाह ज्ञानमित्यादिना प्रथमं क्रियादीक्षां निरूपयति देशिक इत्यादिना दर्भमुष्टिना मान्त्रिक
रानेकत्र शोभाढ्ये शिवाग्न्यासनाय स्थापयेत् वह्नीनां नाम अग्रतो मंत्रदेवता मध्ये पुरतः वामदक्षिणतः परितः ॥
वामदक्षिणे निजवामदक्षिणे तमेवंभूतं शुद्धिप्रकारं दर्शयति स्वमुद्धेत्यादिना परमात्मनि द्वाद
शान्तस्थिते चिन्मन्त्रेण सोऽहमिति परमात्ममंत्रेण कारणे परमात्मनीति संबंधः व्युत्क्रमेणेति
आकाशवायुवह्निजलपृथिव्यादीनां व्युत्क्रमेण यथा पृथिवीं जले जलमग्नौ इत्येवंप्रकारेण देहं
संशोषयेत् केन प्रकारेण नाभिमंडलस्थितेन वायुं वायुबीजेन यकारेणोद्दीप्य तेन वायुना देहं
शोषितं ध्यायेदित्यर्थः तेनैवेति वह्निबीजेन रकारेणेति यावत् विश्लेषयेत् दहेत् अमृतेन
अमृतबीजेन वकारेण अमृतांभसा वकारस्थाविनांभसा द्वादशान्तस्थितपरमात्मनि लीनानि
तस्मिन्नेव लीनं जीवात्मानं हंस देवस्य जीवस्य हंस इति मंत्रेण जातिभिश्चतुर्थी विभक्तिसहितैः
कोटिकाभिर्नाराचमुद्राभिः सर्वेष्वेवमेव षडङ्गानीत्याह पंचाङ्गानीति स्वैनैव मन्त्रेणेति
पूजा द्विविधा आभ्यन्तरा बाह्या च तत्राभ्यन्तरपूजाप्रकारमाह कल्पयेदित्यादिना एवं
पूर्वादिषु पीठमनुं योगपीठात्मने नम इति मनुं तत्र प्रतिपदोक्तमन्त्रं वा पद्मासनादिषु दं

कला: अकारउकारमकारा: ॐ ष्टांत्स्थानान्मूलमंत्रमष्टवारं जपेत् तस्यांगं मूलमंत्रस्याष
डंगं तस्मिञ्जलेन्यसेत् यथान्यायं समाहितचित्तः न्यासक्रमेणाष्टवर्गंस्वदेहे धर्मादीनुक्त
पादस्थानेषु कलशे तेषु तस्मिन्नीवंशजपेदिति षडंगं संबन्धः तमेव षड्जापप्रकारं दर्शयति
पंचकृत्येत्यादिना गुरूपदिष्टविधिना शेषमिति न्यासध्यानादिकमित्यर्थः साधुरस्ययवि
नः मंडलकर्णिकामध्ये कलशं संजाय यथावदनुक्रमारभते शालिभिरित्यादिना तेषु तंडुलेषु
कूर्चं दर्भमयं ग्रंथिं धर्माय नमः इत्युक्तमन्त्रमयमित्यर्थः अधः कूर्मशिलेत्यारभ्य हेमादिर
चितमित्यन्तः प्राकृतो ग्रन्थः स्पष्टार्थः त्रिगुणात्मना सत्वादित्रिगुणात्मना तद्वन्मूलमन्त्र
प्रतिलोमेनेति द्वादशात्मनः सूर्यस्य मूलमंत्रं प्रतिलोमेन तत्र स्वाऽऽवाहयेदिति ततेन स(
वंध: तत्र तत्रेति प्रत्येकं चतुर्नवतिमंत्राणामित्यर्थः त्रिविधं मन्त्राष्टकं यथाक्रमं दर्शयति
चन्दनेत्यादिना चोरः कचोरः कपिरक्तचन्दनं ह्रीवीरं कर्पूरजलं सुगन्धिशिफा विशेषः
अप्रभाषायां कुरवेन हेमकंड भूतिं प्रालप्रतिष्ठामन्त्रमुद्गरति पाशेत्यादिना आं ह्रीं क्रों
इतिस्वतरं शेषं सुगमं इन्द्रवल्ली अन्यभाषायां पावति कान्यकुब्जभाषायां इडान अस्मि
न्नापरं कुंभेकलशाग्निने फलधियेति संबन्धः कलशान्मूर्धनि मूलमंत्रेणावेष्टयेदित्यर्थः अ(
कलशे मन्त्रदेवतामावाह्य पूजयेदित्युक्तं तमेव षड्जाप्रकारं यथावद्दर्शयितुमारभते मूल

शा॰टी
पृ॰ ८

४

मंत्रं समुच्चार्येत्यादिना आनीयेत्ययमर्थः स्वस्थानात् हृदयकमलात् वामनासिकारन्ध्रनिर्ग
तं तेजः आनीय निजकरे दक्षिणे मातृकापद्मं संचिन्त्य तत्पुष्पाञ्जलिं चयेन चैतत्संयुक्तं संचिन्त्य
कलशमध्ये देवतामूर्तिमनुसंस्मरन् तस्याः शिरसि ब्रह्मरंध्रस्थाने संयोज्य देवतामावाहयामीत्या
वाहयेत् सुधीः सुबुद्धिर्मन्त्रतन्त्रनिपुण इत्यर्थः सकलीकरणं न्यासादित्यर्थः परमीकरणमेक
कीकरणं ज्ञानरोगग्रथः स्पष्टः सुधामंत्रं वकारः ततश्च मन्ते एतत् उक्तं प्रत्युपकारं मातृकान्तरे
मुच्चार्य मूलमंत्रेण कुर्यात् इयं मातृकान्तरमुच्चार्य मूलमुच्चरेत् पुनर्मातृकान्तरमुच्चार्य्य स
परिवाराय देवाय गंधो नमः इत्यादिप्रकारेण मुनिपञ्चकमागत्य पत्रे आन्यान्यपीत्यारभ्य एवं
संस्रज्येत्यंतो ग्रन्थः स्पष्टार्थः वैश्वदेवहोमप्रकारं यथावदनुमारभते इतिलेस्थण्डिलमित्या
दिना विश्वश्चासौ देवश्चेति विश्वदेवः स एव वैश्वदेवः प्रधानदेवतासंबंधिवैश्वदेवहोमः।
प्रधानदेवतायां संयोज्यैकीकृत्य परितश्चतुर्दिक्षु गंधतोयान्वितेन बलिं विकिरेदिति स्पष्टार्थ
मपरं पूर्वं संचिते दर्भमुष्टिना वर्तुलीकृतासनत्वेन शंभोर्दिशि ऐशान्यां उत्फलतुले क
र्कटीं संस्थाप्य तस्यां पश्चिमाभिमुखीं मुक्तकेशं पिंगलीं आस्थदेवतां चलासने निवसद्वसनं कृत्य
रक्तेतिमंत्रेणावाहनमपुष्पाञ्जलिं मंडपस्थानात्ः प्रदक्षिणं परिवर्त्य नरसिंहस्थाने कर्कटीं निवे
शयेत् ततउपविश्य तामसद्देवतां पुनरपि गंधाद्यैरर्चयेत् पुनरपि स्थण्डिले अग्निमादा

८

य संस्कृते वह्नौ तीरेण चरुं पचेत् कथं तदाह अस्ले लेत्यादिना त्रिधा कल्पिते एकं भागं देवतायै नमः इविश
धामदेवतायै समर्प्य अग्नये स्वाहेत्यग्नौ हुत्वा शिष्यमात्मीयं स्वयं शिष्येण सह प्राशयेत अनस्राव
मना तन्त्रं शिष्यं सकलीकृत्याग्न्यादौ कृत्वा उक्तलक्षणं दन्तकाष्ठं शिष्याय दद्यात् सोपि तन्नत्ता स्व
विसृजेयेद्यथाविधि तमाचामं शिखावन्धनेन दिनमानीय अमुनाभावेन वेष्टं कुण्डस्य पश्चिमे
भागे दर्भतालीये तत्र तस्यां रात्रौ शयीत गुरुः शिष्येण सह अधिवासः सविशेषः इति श्रीहंसापंचदीपि
कायां चतुर्थः पटलः ४ ॥ अथ होमप्रकारं वक्तुं पंचमः पटलमारभते ततोग्निजननमित्यादिना ।
कुण्डसंस्कारान्तदर्शयति अथ होमेति कथं वह्निनमनमिति एकमेवाक्षरंत्यजेत् जिह्वाममन्त्रानुद्धरति व
ह्नीरेति वह्निः रकारः इला वायुबीजं यकारः अधीशः ऊकारः एतैः संयुक्ताः सादियान्ताः सविन्दवो वर्णाः
जिह्वामन्त्राः अथ मन्त्रोद्धारः स्र्यूं श्र्यूं ष्र्यूं ल्र्यूं व्र्यूं य्र्यूं एते प्रत्येकं क्रमेण जिह्वामन्त्राः सात्विकराजस
तामसभेदेन यथाक्रमं जिह्वा त्रैविध्यमाह जिह्वा इति क्रमेण तासां नामधि देवताः उदर्पयते अमात्येत्यादि
ना उक्तरोचन्त्यः स्पष्टार्थः तदग्र मध्यमूलानि तैः क्रमेण यथाक्रमं अग्रमध्यमूलैः शोध
येत् मात्रासंस्कारान्वक्तुमारभते क्रमेण निरुह्येत्यादिना निरुह्य उद्धृत्य वह्नेर्गर्भाधानादि षोडश
संस्काराः क्रमेण कथ्यन्ते गर्भाधानेत्यादिना तस्यापि तौ वह्नेः पितरौ पार्वतीपरमेश्वरौ विघ्नेश्वरस्यं
वेण दशधा विभक्तेन जुहुयात् कथं ॐ एकाहुतिः ॐ श्रीद्वितीया एवं ... मंत्रेण तञ्चाहुतीर्हु

शा॰ ति॰
दी॰ गृ॰
९

त्वा अवेतरं तत्प्रणयेत् वरवरदस्त्वं मन्त्रेण वशमानयस्वाहा इति विन्यस्य एवं देशेति अध्वविशोधनमित्यु
तः प्राकृतः स्पष्टार्थः अध्वशोधनमेव व्यनक्ति पदध्वेति एतत्स्थाने ष्वन्यस्य ततः शोके नमार्गेणैव
हुमान्तेन मंत्रेण जुहुयात् एतदध्वशोधनेनाम अध्वविलयनप्रकारमेवाह शिवेइति स्पष्टार्थं ममप
रं सकलीकृतिं न्याय्यं अभिषेकप्रकारमाह विधिवदिति तयोर्द्वितीयोशि अयोः पदेक्रियादीनास्तु
पूर्वका इदानीं वर्णदीक्षाप्रकारमाह अथेति ग्रंथः स्पष्टार्थः इदानीं कलादीक्षामाह ततइति
वेदध्येत्सं स्मरेत् अधुना वेदमयीं दीक्षां दर्शयति ततो वेदमयीमिति तेजस्तद्वत् होमसंख्यां ग्रिम
यं षडङ्गकं मूलाधारस्वाधिष्ठाननाभिहृदयकण्ठभ्रूमध्यं यथाक्रमं चतुःषड्दशद्वादशषो
डशद्विपत्राणि षडङ्गकानि ततः सप्ताधिष्ठानदेवतास्तु कमलासनविष्णुरुद्रेशसदाशिवपर्यन्तास्तु
सर्वेष्वेव सहितास्ते हन्त ततस्त्वं विदो तेकत्वायं तं तादे तमपि तादाते तं तुल्यमण्डं तोवि भुवक्रो
नरे नहुक्तं मर्कटकं एतानि विद्यादीनि शक्तिमध्यानीति ज्ञेयानि एतत्सर्वं परमेशिवे वेधयेत् ज्ञा
येदिति स्पष्टार्थः एवं दीक्षितस्य फलमाह सर्वीतयेति होमद्रव्यपरिमाणकथनपरो ग्रंथः स्पष्टार्थः
ततहोमकाले हुताशनस्य लक्षणमाह वैश्वानरमित्यादिना वैश्वानरस्य मुखं ज्ञात्वा तत्रैव
होमः कर्तव्यः अन्यत्र वह्नौ लौकिकादिषु दोषमाह कलौ होमइत्यादिना होमकाले धूमस्य धूमध्व
जस्य च शुभवर्णं ध्वनिगंधादिकारणं शुभाशुभमहितत्त्वं दर्शयति स्वर्णसिंदूरइत्यादिना ।

९

इति गूढार्थदीपिकायां पंचमः पटलः ५ ॥ अथ पुनर्दीक्षाविधानकथनानंतरमवसरप्राप्तैः मंत्रा
न्वाचख्यामः प्रथमं सर्वेष्टकृतिभूतां मातृकां प्रपंचयितुमारभते अथ वर्णान्नतुमित्यादिना अक्षी
वेति नपुंसकचतुष्टयव्यतिरिक्ते ह्रस्वदीर्घस्वरद्वयं तन्नेतैः ककारादिवद्गुणकैरिति अथ मध्ये:
ऐकैलैगौघैङ ञोः हृदयादयमः इत्यादि यकारोलेति नातिपूर्ककाति चतुर्थीविभक्तिपूर्ककाति
ध्यानमाह पंचाशल्लिपिभिरिति अनेनवर्णे अक्षमाला ककुदि अपराले मातृकाप्रजो वर्ण
यति व्योमेति अष्टदलेपद्मविरच्य तत्कर्णिकायां व्योमहकारः इन्दुः सकारः औसत्वरूपं स
नाविसर्गः ततस्थापयमर्घ्यः एतैः सपिंडितं बीजं कर्णिकायां हौः इति लिखेत स्वरयुग्मकैः
स्फुरत्केसरं अष्टपत्रेषु कादिलांतान् अष्टवर्गान् आशास्विति पश्चाद्दहिरभ्रे पुरे विलसान्भ्यंत
रेफर्वाहिरिति लांतो वकारः अस्मिंस्तु कोणेषु आग्नेयादिषु लांगलिः वकारः पवेह्कुले भूगेहेना
वृतं पद्मं तत्कर्णिकायां देवीं च पूजयेदिति समुदायार्थः आधारशक्तिमित्यारभ्य साधकसत्तम
इत्यन्तो ग्रंथः स्पष्टः अष्टाद्रिपर्वकं मातृकायाः दशविधन्यासान् क्रमेण वक्तुमारभते न्यसेत्स
गेन्दिनामित्यादिना गोशीन्याभिः पंचाशत्कलाभिः तार्तीयं त्रिपुरामंत्रचरमबीजं तद्बीज
पूर्वो ह्रस्वधातु प्राणेति ह्रस्वधातु प्राणशक्तिः आत्मपुराणं यादिक्षवर्णानुक्रमस्यानेपुन्यसे

शा.ति. टी.न्या. १०

दिति कथं ऐं ब्रह्मात्मने नमः ऐं अन्तरात्मने नमः इत्येवमन्यत्रापि प्राणात्मने शक्त्यात्मने ज्ञा
नात्मने इत्यादिप्रकारेण ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहेति इत्यादिप्रकारेण स्वरभाभ्यां काम
बीजाभ्यां षडङ्गानीति उक्तार्थः आदिबीजेनेति अविरलकलस्य लिपिविग्रहभागेन प्रोक्तः पूर्वां हृल्ले
खायाः पूर्वां आद्यक्षरेण श्रीबीजेन स्वरबद्धां पुनरपि कामबीजाद्यां विद्यां प्रलपेत् इदानीं प्रपञ्च
यागाख्यन्यासमाह प्रपञ्चेति वेदादिः प्रणवः अधुना न्यासस्य कथं प्रपञ्चत्वमित्याशंक्याह तदा लोके
प्रपञ्चात्मकत्वात् तदात्मकत्वे पुनः किमित्याह पञ्चभूतेत्यादिना परतेजसि परमात्मनि तत्तत्स्था
नसहितानां वर्णानां न्युद्धरेत् उपसंहरेदित्यर्थः फलमाह एवमिति एवं न्यासं कृत्वा किं कुर्या
त् इत्यत आह ध्यायेदिति एवं वर्णैर्न्यासात्मके प्रपञ्चयागमभिधायाधुना बहिर्यागमुद्दिश्येष्टिहो
मप्रकारं तत्फलं चाह इष्ट्वेति नानेव [illegible] अग्निस्थेत्यादिना एभिर्द्रव्यैरेव प्रपञ्चम
यैः [illegible] होमस्य फलमाह सर्वानिति फलान्तराण्यप्याह एभिरित्यादिना एक
कलशाभिषेकप्रकारं तत्फलं चाभिधाय नवकलशाभिषेकं तत्फलं च वक्तुमारभते सर्वो
के मङ्गलमित्यादिना अन्तरे गन्धः स्पष्टार्थः मातृकामन्त्रसाधितमुद्राविधानमाह सोमं
सूर्येत्यादिना स्वरादतः [illegible] पञ्चविंशतिदशान्तरं तत्त्वयाहर्यर्थः साधितमुद्रि

कार्याः फलमाह इयं रक्षेत्यादिना अधुना नवरत्नमयमन्त्रविधानं तत्फलं तत्फलं च निरूप
यितुं नववर्णो वर्गे रत्नोद्धृतिपादयन्नाह विभजेन्मातृकामित्यादिना नवरत्नानां नामान्याह
माणिक्यमित्यादिना मातृकायन्त्रमाह तार्तीयीयं स्वलककर्णिकमिति अस्य व्याख्यानं प्रागेवकृ
तं योऽमेघ्निध्यत्र तेषु प्रसाधिकारान्तं पुनर्निरूपणे इति श्रीरुद्रयामलदीपिकायां षष्ठः पटलः ६ ॥
एवं शब्दलिमातृकामन्त्रविधानं नवरत्नविधानानि शब्दलेखकम्‌ तल्लिपिसंस्थमातृकामन्त्रविधानं
कथयति अथेति तस्मान्नववर्णात्मकत्वात्सूचयन्नव वर्गान्विभजेत् एवं हृस्वेत्यादिना अ
थमवर्गं निरूपः एवं हृस्वाः अइउऋऌ संधिवर्णाः एऐओऔ अं महकारः इति यकारः अग्निः रे
फः जलं वकारः धरा लकारः तन्नवस्थं प्रथमवर्गः इत्यादौ अन्त्यमात्रमितिप्रथमवर्गः कवर्गस्थाने
हकारः आद्यं ककारः द्वितीयं खकारः चतुर्थं घकारः मध्यमं गकारः ततः ङ-क-ख-घ-ग इति द्वि
तीयवर्गः एवमन्यत्रापि अन्त्यमात्रमितिन्यासं च छ झ ज ञ एवं तृतीयवर्गः ण ट ठ ढ ड चतुर्थवर्गः न
तथधदन पञ्चमवर्गः म पफभब षष्ठवर्गः श षसह सप्तमः एवं नववर्णो लिपिकाभृत् तल्लिपिः
नववर्णाद्यवर्णानि दर्शयति अत्र वर्णाः इति भवति वर्णाक्षरं पञ्चमात्रकाक्षर ङ ञ ण न माः
शालेसंयुक्ताः शालिः शकारः नवयुक्ताः वर्णादिवर्णे वेदितव्याः अकारपरवायवर्गिवानि

शा· ति·
टी· रू·
२२

पृथिवीमयत्वे वर्गवर्णानां प्रत्येकं क्रमेण दर्शयति योनिरित्यादिना नर्हि पवर्गमेवमन्तवर्गवर्णानां प्रत्ये
कवोड्ख्येनेत्याह द्वितीयवर्गे इति द्वितीयवर्गे पकारादिवर्गे तत्र भकारवाचकावर्णं नास्ति तस्मात्तेषव
तुष्टयात्मकत्वात् तवर्गे शकारादिवर्गे तस्य अतरात्मकत्वात् जलवाचकधरावाचकाद्वरेत
लः हादिषट्कं कैरिति तवर्गमध्ये हकारमलान्तमाद्वरादिवर्णैः क्रिमादिभिः व्याख्यानमपरं त्रै
कोणकेति कलङ्करहितस्यार्थः मधुमदात् आसवमदात् विधीपुस्तकं अकारादि औकारान्त
सादिवर्गेत्रयात्मकं तत्स्वराणां न्यासस्थानान्याह आधारेत्यादिना अधिष्ठानेलिंगेविन्दोल
नाहस्थाने नाहेमूर्ध्नि शक्तौ तस्मादुपरिस्थिते द्वादशान्ते तृतीयवर्णान्तां न्यासस्थानान्याह
कण्ठेमिति कण्ठादिपंचचक्रेष्वित्यर्थः गकारादिबकारान्तपंचवर्णान्तरं न्यासस्थानान्याह
गलमूलेत्यादिना गलपायुंपर्यन्तं लिंगत्रहः ङकारसंम्बन्धे ककारं वायुमूले खकारं उपमूले
ऊर्ध्वमध्यसंधावित्यर्थः घकारसंबन्धि मूलेषु गकारं मध्ये देशमलिंगवन्धे गेम्ल्लमूलदे
त्यर्थः पवर्गचतुष्टयं न्यस्य मकारं तदवरे दक्षिणपार्श्वे पकारं [illegible] तरे फकारं नाभौ भकारं
हृदे बकारं शावकन्वंया तत्कावर्णिष्ठवर्गन्यासस्थानान्याह यथाक्रमं [illegible]
ति ... न्यासस्थानये वर्णास्तिलत्र पुकान्यसेत ... विंदुसंयुतान् ।

२२

ऋषि तु वह्निवर्णं च यमं स्मृतं ततो वायुवर्णं ततो जलवर्णं तत आकाशवर्णं तु नमः इति वर्णा इत्येवंप्र
कारेण न्यसेत् कथं लं: वं: यं: रं: नं: एवमन्यत्रापि बोद्धव्यं हृदि न्यासमये प्रतिलो
मेन बिन्दुयुतं नं यं रं वं लं इति न्यासे न्यसेत् एवमन्यत्रापि नियमः सर्वथा तत्पदं ।
यंत्र क्रियाविशेषोऽपि तत्र कर्मणि साधयेत् इत्युक्ते तानेव वर्णान् न्यासीकृत्य मारभते
विद्यामपि त्यादिना मंत्रचार्येन्द्र हार्थः विद्या सनातनी सानुस्वारं हकारं शिव युक्तं एकार
न्यायुक्तं हेमिति भवति तानीवत् पर्यायुक्तः सदृशैव तन्यतः तमो नः नतश्च तानि नेनन
इति भवति साध्यव न्वतो णिवलिखेत् तानि कानि यदुक्तं यंत्रे लिखेत् तस्य नामा
एतरंसिद्धादिकोष्ठमध्ये यश्चिंकोष्ठे तिष्ठति तत्कोष्ठमतादनानि तस्य बंधुदानानि तैः
सह लिखेदित्यर्थः सर्वाग्रपत्रेषु प्रत्येकमाकाश वर्णं तु एकैकं हकारं शुद्धिं कृत्वा लि
खेत् कथं हं यं हं हं वं हं हं हं हं हं हं हं लं हं हं नं हं हं मं हं हं सं हं इत्यनेव प्रकारेणाद्धका
रस्यापि हकारशुद्धिं तथा एकमध्यस्थं अवशिष्टं तदग्रतन्य पत्रे हकारशुद्धिं कृत्वा लिखेत् त
स्याधोऽग्र पत्रे वर्णं द्वयं भवेत् ततः पुनराकाशमंडलेन वेष्टयेत् एतद्धि यंत्रे विधिना कृत
मुक्तफलप्रदं योऽसाविति ऋवत्दलं कमले कृत्वा कर्णिकायां यकारद्वयं मातृस्थापि ये इति

शा॰ ति॰
टी॰ रा॰
१२

हुं

लिखित्वा पुनस्तत्रैव कोणेषु नमः इति च तत्पश्चात् नमः इति भवति कोणेषु यन्त्र मः इत्यस्मिन्नेव यन्त्रे ।
दले षट्कस्तु वायुवर्णेन यकारेणावृतिमान् अष्टदलं तद्दलेषु लिखेत् पश्चाद् वायुमण्डलेन वेष्टयेत् यन्
त्रायुधं तस्मात् लिखित्वा तन्मुक्तिफलप्रदं वह्निबीजमिति रेफः हृद्यं अवलम्ब्य कारः सर्गः ओकारः अ
र्धेन्दुरनुस्वारः क्रमेण तस्य बाधते एतद्युक्तं भवति अष्टदलपद्मं विरच्य तन्मध्ये हंरौं लिखित्वा रे
रौं रौं इति स्वरूपं हुंकृदैन नमः इति तत्पश्चात् रौं रौं फट् नमः इति च लिखित्वा कोणेषु वह्निवर्णे
न वह्निपुटितान् सर्वे वस्तावधनाम आदरस्थाय कोणगतान् तारैर्लिखित्वा अन्यमन्त्रं मन्त्रस्य च दे
अग्निमण्डलेन पश्चाद्वेष्टयेत् इदमाग्नेयं यन्त्रं मुक्तिफलप्रदं भवति इत्यस्मिन्नेव साध्यनामकाद्
रसहितं मरीकोणगतान् तारसहितं क्लींकारान् मोहयेत् वितन्मात्रेण वेष्टयेत् लिखित्वा मुक्तिफल
प्रदं भवति नामार्धेन्दुना इति नाम आकारः अर्धेन्दुरनुस्वारः तद्युक्तं वकारः वमिति भवति त
स्मात् पूर्वं तत् अंशु मन्तु चेत् वर्णात् त्वौ कारयुतं अर्धेन्दुरनुस्वारः तत्सहितं वौमिति भव
ति ङेन्तं तत्स्वरूपं नमः विधुः स्वरूपं पुनः तदन्ते भवेत् स्वरूपं नमः इति स्वरूपं अथायं तात्पर्यः
अष्टदलकमलं कोणान् बाह्य कलिकायां हौं वौं विधवे विधुमण्डलाय नमः इति लिखित्वा तत्पत्रेषु वा
हणान्वर्णान् वकारपुटितान् वं वं धवलवर्णसहितान् विलिख्य आप्यपुरेण वेष्टयेत् सम्यक् साधयेत्

यथोक्तफलसिद्धिः गंडो विंदिति गंडो लकारः विंदु विभूषितः अनुस्वारसहितः वसुमतीमबीजं
ग्लौं तमाह शीविंदु मतीगंडयोर्मध्यस्थौ जगौ गंडयोर्लकारयोर्मध्ये जगारगकारौ लिखेत् लतुकेन
मूर्तिस्वरूपं पतन्त्रे त्रंमध्ये लिखेत् अग्राद्यं निस्रहः वसुकुंदं पंकजं विलिखेत् तं कर्णिकामध्ये
लं ग्लौं लजगल लुकेन मूर्तिं विलिखेद्दलेषु लालं पुटिता त्वसुमती वलोन्त्याध्यस्य सिद्धको
ष्ठवर्णैः सहितां लिखेत् अनन्तेले अनन्तपलाशे पत्रे भूगृहेण वेष्टयेत् एतत्पार्थिवयंत्रकं विधि
नार्चितं उक्तफलप्रदं अतिरोहितार्थमन्यत् अविरिति अविः ईकारः वृत्त लोवकारः तेन रुद्रः

वदवद

द्रुतिः वाग्वादिनि स्वरूपं वद्धय स्वाहा ततः वाग्वादिनि स्वाहा इति सिद्धं अनन्तरस्या नाम्याह ।
शिरसन्यादिना मंत्रेषु गुह्ये गुप्तकश्रीः गुप्तकमेव उत्तरो ग्रंथः स्पष्टार्थः मुद्राव्याख्यानमुद्रा
मंत्रान्तरमुद्धरति हृदयेत्यादिना हृदयान्ते नमः शब्दान्ते भगवति स्वरूपं वदद्वयं युगं स्वरूपं वाग्वादि
निस्वरूपं वह्निजायास्वाहाकारः वाग्भवाद्यं ऐंकाराद्यं वह्निः पदैरिति ऐं नमो भगवति वद वद वा
ग्वादिनि स्वाहा इति पदच्छेदः विद्या गुप्तकं अतिरोहितार्थमपरं मंत्रान्तरमाह तारमिति तारं प्रणवः
मायाहृल्लेखा अधरः ऐकारः विंदुरनुस्वारः शक्तिः हृल्लेखा पुनः प्रणवः सरस्वतीस्वरूपं हे नाव
तुर्थं नाकान्तिकः स्वरूपं ततश्च ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः इत्येकादशाक्षरः सिद्धमिति वर्ण

न्यासस्थानान्याह ब्रह्मरंध्र इति मूर्द्धा अनन्तगुणमन्त्रमालां विद्याधरकं स्पष्टार्थमपरम्
मंत्रान्तरमाह वाचस्पतइति वाचस्पते अमृतेइतिस्वरूपं प्लवः प्लुरितिस्वरूपं वाग्बीजा
दिः ततः ऐंवाचस्पतेअमृते प्लवः प्लुः एवमेकादशाक्षरा पंचभिः पदैः ऐं वाचस्पते अ
मृते प्लवः प्लुरिति जपवटीजपमालां अतिरोहितार्थमपरम् मन्त्रान्तरमाह तोयस्थ
मिति तोयं वकारः तत्स्थ विलोमः अथ तनुमनन्तः तस्या आकारः चन्द्रसुखशब्देन बिन्दुमात्रं गृ
ह्यते ततश्च वामिति प्रथमं बीजं सिद्धं बिन्दुधीशाद्युतो वह्निः बिन्दुरनुस्वारः अधीश
ऊकारः तत्संयुक्तो वह्नी रेफः ततश्च हूं इति सिद्धं बिंदुरनुस्वारः सद्यडो आकारः अम्बुवकारः
मृत्युः सकारः ततश्च स्वोमिति तृतीयबीजं सिद्धं स्पष्टार्थमपरं व्याख्या व्याख्यानसुन्द्रा
दिनागमे प्रातः पिण्याकं तिलोच्छिष्टं अथ भाषायां तैलकीपिंडी हुतममन्यत् ॥
सप्तमः पटलः ॥ ७ ॥ अनन्तरं श्रीमन्त्रवक्तुमारभते अथेत्यादिना तत्र प्रथम
मेकाक्षरमंत्रमुद्धरति वान्तमिति वान्तं शकारः वह्नी रेफः वामनेत्रमीकारः इन्दुर्बि
न्दुः ततः श्रीमिति सिद्ध्यति श्राम् तत्संप्लव इत्यन्तः प्राक्तेनाग्रन्थः स्पष्टार्थः मन्त्रान्तर
माह वाग्भवमिति वाग्भवः ऐकारः विष्णोर्वनिता श्री मायाह्रीं मकरकेतनः क्लीं

२२

एवंवीजचतुष्टयात्मकमपरं लक्ष्मीमंत्रं विशदमन्यत्र मन्त्रान्तरमुद्धरति दीर्घेति ।
दीर्घो नकारः यादिर्लकारः स एव विसर्गान्तः तेन नम इति सिध्यति ग्रलोककारः भानु
मेकारः वसुधरालकारः वान्तेति स्येत्स्वरूपं प्रियावह्निः स्वाहा तेनों नमः कमलवा
सिन्यै स्वाहा एवं दशाक्षरमपरं लक्ष्मीमंत्रम् देव्यै नमः हृदयाय पद्मिन्यै नमः शिरः ।
विष्णुपत्न्यै नमः शिखा वरदायै नमः कवचं कमलरूपायै नमः अस्त्रं इत्येवं प्रकारे
ण षडंगवादिकाः अत्र मंत्राः अतिरोहितार्थ एवम् मन्त्रान्तरमाह वाग्भवमिति वा
ग्भवं ऐं भुवनेशी नाम भुवनेशी रमा श्रीबीजं मकरकेतनः कामबीजं तार्तीयं सौः जग
त्स्वरूपं वार्धिः पकारः रेफयुक्तः अर्घीशा हृकारयुतः भृगुः सकारः स्येरूपं न
मः स्वरूपं तत्स्वरूपं ऐं ह्रीं श्रीं क्लीं सौः जगत्प्रसूत्यै नमः इति इतद्ध्यानवर्णनप्रसो
ग्रथः स्पष्टार्थः अत्र हिमांशु काश्मीरकुंकुमं मत्तालिमालामत्तभृङ्गमाला धम्मि
ल्लकेशपाशं करनन्दनगणनाथं व एमुखेवा जन्मस्य हस्ते गंगायमुने दिग्गजान
वदर्शयति ऐरावणइत्यादिना हृत्वा नवपदेत्यन्तः श्लोकः स्पष्टार्थः अभिधे कम
कारमाह हृत्वा नवपदेत्यादिना यंत्रभूषितं वक्ष्यमाणयंत्रभूषिते शक्रवल्ली इ
वल्ली कान्ता विष्णुक्रान्ता धात्री आमलकं सौगंधिकं कल्हारं उत्पलं पद्मं मयुरं

ग्रा॰ टी॰
गू॰ दी॰
२८

14

ष्ठिं होमैःपञ्चवस्त्रैः तान्कलशानु नैष्ठिकं स्त्रिषिच्य वाससीपरिधाय अभिषेकफल॥
माह नरपतिरिति यन्त्रमाह वेदादिस्थितेत्यादिना द्वादशारंपद्मं विरचय्य तत्कर्णि
कायांप्रणवंविलिख्य तन्मध्येसाध्यनाम श्रीशक्तिकामबीजसहितं तथैव किंजल्केषु प
कैकपत्रमूले किंजल्कद्वयं द्वादशपत्रमध्ये मन्त्राक्षराण्येकैकशो विलिख्य तद्बहिः षोड
शदलंकमलंकृत्वा तत्केसरस्थानेषुद्वौद्वौव्यंजनानि पत्रेषु षोडशस्वरांल्लिखित्वा बहिः
भूबिम्बद्वयं वषडन्तयानवितयासंवेष्ट्य भूपुरद्वयकोणेषु कृत्वा पुनः पुनः यन्त्रकल्पना॥
माह महालक्ष्मीति मन्त्रान्तरमाह ईशपत्नीति ईशपत्नी क्लीं श्रियायुक्ता श्रीबीजपु
टिता कमलस्वरूपे भगवति एकारयुक्ता मही भूबीजंलः बलाककारः आदिमोमकारः
धरालकारः दीर्घादीर्घयुता लामेणादिः लकारादिः भगवान्महत्व एकारयुक्तो यकारः
प्रसीदयुग्मंस्वरूप श्रीकजाभुवनेश्वरी पुनरपिबीजत्रयं महालक्ष्मीस्वरूपं नमोन्तः
स्वरूपे प्रणवादि ततश्चायमर्थः ॐ श्रीं क्लीं श्रीं कमले कमलालये प्रसीद प्रसीद
श्रीं क्लीं श्रीं महालक्ष्म्यैनमः इति त्रिबीजपुटितेति अयमर्थः श्रीं क्लीं श्रीं कमले श्रीं॥
क्लीं श्रीं हृदयायनमः श्रीं क्लीं श्रीं कमलालये श्रीं शिरसे स्वाहेत्यादिविधया न्यासः शे
षंनिगदव्याख्यातम् ॥ इतिगूढार्थदीपिकायामष्टमः पटलः ॥ ८ ॥ श्रीः

२८

श्रीमंत्रमुक्त्वानंतरं भुवनेश्वरीमंत्रं वक्तुमारभते अथेत्यादिना मंत्रमुद्धरति नकुलीश इति
नकुलीशो हकारः अग्नीरेफः वामनेत्रं ईकारः अर्धचंद्रश्चात् विंदुनादप्रतैः संपिंडितं भुवनेश्वरीबी
जं षडंगमंत्रानुद्धरति सद्यादीति सद्यः ओकारः तदादिक्रमेण पंचह्रस्वाः ओ अ इ उ ऋ लृ एभिः
पंचभिर्बीजैस्तत्तस्यानेत्रं हृल्लेखाद्यास्तल्लक्षाः एवमुक्तेषु एतजापहोमकेषु मंत्रांगं गुह्यस्या
नेनास्य श्रीकामदेवस्यर्षेः स्य च्छन्दोमपरं यंत्रस्वतत्रप्रकारमाह पाक्यं तद्दलादिना वह्निंदहेद्वित
लिख्येत् सत्मध्ये भुवनेश्वरीबीजं लिखित्वा तन्मध्ये साध्यनामसहितं कामे कथं देवदत्तं सदारयेति को
णत्रयमध्ये सानुस्वारमिकारं लिखेत् प्रत्येकं तद्बहिः कोणत्रये भुवनेश्वरीबीजत्रयं तल्लिखित्वा
तत्लिख्यमनेन वह्निचितत्वात् ग्रंथांतरप्रकारेण बध्नीयात् कथं एतां बीजानामेकैकस्यैकेन तत्
बीजं प्रदक्षिणीकृत्यान्यस्य मायाबीजं ईकारांतं बध्नीयात् पश्चात्कोणकपोलयोः हसिहरहसि इति
लिखेत् कपोलशब्देन बीजत्रयस्य पार्श्वत्रयं विवक्षितं अत्र केचिदेवं वर्णयंति हसिहरश
ब्देन स्वरूपग्रहणं न भवति किंतु हरिशब्देन हकाररेफईकाराः सूच्यंते हरशब्देन हकाररेफावि
ति एतावता किमुक्तं भवति ह्रीं ह्र इति लिखेदिति अयमेव पक्षः साधीयान् पश्चात् हरिहरहूं ह्री
इति लिखेत् अथवा ह्रीं ह्रीं इति वा तद्बहिः पंचाशद्दलैरष्टदलैर्वेष्टयेत् पुनर्मध्ये रहहणेच एतत्त्रिग

लितं येन मुक्तफलप्रदं भवति अत्रार्थस्तु वह्नेर्भवन इति संबंधः कोणगते पुनः ईषुनमिति छेदः
अनलैः पुनरीषुतैः तैर्हरिहरवर्णैरीषुतैः ईकारसहितैः अथवा सामान्येन सर्वेमान्नायकेनापराम
शिना प्रकृतपरामर्शिना प्रकृतसर्वं यत्नुणस्य पुक्तत्वात् प्रकृते हल्लेखा बीजमपि न ह्रीं नानैः
लिपरामर्शीपुक्तः अतस्य हल्लेखा सहितैः हरिहरवर्णैर्वेष्टयेदित्यर्थः इदानीं षडस्रितं यं
त्रं वक्तुमारभते बीजां न लिस्यादिना अयमर्थः पूर्वोक्तत्रिकोणद्वयं संपुटितं तस्मिंस्त्रिकोणमध्ये
ध्ये हल्लेखा बीजमालिख्य तदन्तः साध्यनामकर्मेवालिख्य पूर्ववत् यद्यपि वाग्भवान्मान्ते
न साध्यनाम प्रयुक्तं तथापि तेशांतरपरिपाटोल्लेखनं कार्यं कथं अन्तः स्थितबीजरेफ
भागे साध्यनामालिख्य उपरि ईकारस्थानभागे साधकनाम उभयोर्मध्ये कर्म ततश्च तद्वेष्टने
तिवामपार्श्वे यसंदन्तविन्यस्यधस्तात् रेफभागे वषड् कृतिमध्ये पतङ्गसंस्थे ततः पूर्ववर्णमाये
ति श्रांश्रः पञ्चवाणं भुवनेश्वरीबीजे रेफान्तर्गतं बीजं संवेष्ट्य पुनस्तद्बहिः षट्कोणे वश्यबीजेन सं
वेष्ट्य पुनस्तद्बहिः षट्कामबीजेन संवेष्ट्य वह्निपुरद्वयेन रसस्तुरे षट्कोणेषु तत्रालेख्य यद्यपि सा
मान्येनोक्तं तथापि वामभागकोणत्रये ईकारस्थाने तत्साधकनामयुक्तानि प्रकृतिश्रीकामबी
जानि सान्मकानि सानुस्वाराणि लिखित्वा तान्येव वह्नि पत्नीपदक्षिणकोणत्रयं तत्रालेख्य साध्यना

१५

मस्तहितानिनिरात्मकानि विसर्गसहितानि लिखेत् इति ईकारस्तु कं षट्कोणं षट्कोण
विवरमध्ये सानुस्वार श्रीकारं लिखेत् इत्यर्थः एवंविधे श्रीं हर्व्लौं लिखेदित्यर्थः षट्बीजै
रनुबंध संधि एवंवत् षट्कोणाद्बहिः षट्दले लोबीजानि लिखित्वा एवंवदन्योन्य बध्नीयात्
लिपिभिर्वीतं एवंवद्बहिः पंचाशल्लिपिभिर्वेष्टयेत् बहिर्भूपुरद्वयेनापि तत्कोणेषु द्वीबीदि
दिक्षु नृसिंह बीजं कोणेषु विन्यारं लिखेत् एतत् षट्कोणेति यंत्रमुक्त फलप्रदं षट्कोणेति यं
त्रं व्याख्याय पाशुनाद्वादशकोणे तेयंत्रं निरूपयितु मारभते बीज व्याहृतिभिर्व्याहृतिना स्व
स्यवाय मर्थः एवोक्त षट्कोण द्वयं यथावत् संपुटितं लिखित्वा तन्मध्ये शक्ति बीजं लिखित्वा
